रावासत्वात्तथात्वम्। कुवे(वे) राद्रिप्रभृतयोऽप्यत्र।

**कुब्ज** पु० ईषत् उब्जमाज्र्जवं यत्र शक०। १अपामार्गे राजनि० २खड्गे शब्दमा०। (कुज) ३हृदयपृष्ठरोगे पु० "हृदयं यदि वा पृष्ठमुन्नतं क्रमशः सरुक्। क्रुद्धो वायुर्यदा कुर्य्यात् तदा तं कुब्जमादिशेत्" माधवोक्त लक्षणम्। ४तद्युक्ते (कुजो) त्रि०। "कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किनः" रत्ना०। सच राज्ञामन्तःपुरसहायभेदो यथाह सा०द० तद्दवरोधे इत्युपक्रमे "वामनषण्डकिरातम्लेच्छाभीराः शकारकुब्जाद्याः" अवरोधाधिकारिकुब्जलक्षणमुक्तं वृह०सं० ६९ अ० "पञ्चापरे वामनको जघन्यः कुब्जोऽपरो मण्डलकोऽथ सामी। पूर्वोक्तभूपानुचरा भवन्ति सङ्कीर्णसंज्ञाः शृणु लक्षणैस्तान्"। "कुब्जो नाम्ना यः स शुद्धो ह्यधस्तात् क्षीणः किञ्चित् पूर्व्वकाये नतश्च। हिंसाशीवी नास्तिकोऽर्थैरुपेतो विद्वान् शूरः सूचकः स्यात् कृतज्ञः। कलाखभिज्ञः कलहप्रियश्च प्रभूतभृत्यः प्रमदाजितश्च। सम्पूज्य लोकं प्रजहात्यकस्मात् कुब्जो ऽयमुक्तः सततोद्यतश्च"।

**कुब्जक** पु० कौ उब्जति उब्ज–ण्वुल् शक०। अतिसुरभिपुष्पे वृक्षभेदे 'चम्पकात् पुष्पशतकादशोकं पुष्पमुत्तमम्। अशोकपुष्पसाहस्रात् सेवतीपुष्पमुत्तमम्। सेवतीपुष्पसाहस्रात् कुब्जकं पुष्पमुत्तमम्" शब्दचि०। नरसिं० पुरा० "कुब्जकः सुरभिः स्वादुः कषायानुरसः सरः। त्रिदोषशमनो वृष्यः शीतहर्त्ता च स स्मृतः" इति भावप्र०।

**कुब्जकण्टक** पु० कुब्जः कण्टकोऽस्य। श्वेतखदिरे राजनि०

**कुब्जा** स्त्री कंसभवनस्थे सैरिन्ध्रीभेदे यां पद्मनाभाक्रस्य कृष्णः सुरूपां चकार तत्कथा भाग०१०स्क०४१अ० यथा "अथ व्रजन् राजपथेन माधवः स्त्रियं गृहीताङ्गविलेपभाजनाम्। विलोक्य कुब्जां युवतीं वराननां पप्रच्छ यान्तीं प्रहसन्रसप्रदः। का त्वं वरोर्वे! तदुहानुलेपनं कस्याङ्गने! वा कथयस्व साधु नः। देह्यावयोरङ्गविलेपमुत्तमं श्रेयस्ततस्ते नचिराद्भविष्यति। सैरिन्ध्र्युवाच। दास्यस्म्यहं सुन्दर! कंससम्मता त्रिवक्रनामा ह्यनुलेपकर्म्मणि। मद्भावितं भोजपतेरतिप्रियं विना युवां कोऽन्यतमस्तदर्हति। रूपपेशलमाधुर्य्यहसितालापवीक्षिता। धर्षितात्मा ददौ सान्द्रमुभयोरनुलेपनम्। ततस्तावङ्गरागेण स्ववर्णेतरशोभिना। संप्राप्तपरभागेन शुशुभाते ऽनुरञ्जितैः। प्रसन्नो भगवान् कुब्जां त्रिवक्रां रुचिराननाम्। ऋज्वीं कर्त्तुं मनश्चक्रे दर्शयन् दर्शने फलम्। पद्भ्यामाक्रम्य प्रपदे द्व्यङ्गुल्युत्तानपाणिना। प्रगृह्य चिबुकेऽध्यात्ममुदनीनमदच्युतः। सा तदर्जुसमानाङ्गी वृहच्छ्रोणिपयोधरा। मुकुन्दस्पर्शनात् सद्योबभूव प्रमदोत्तमा"।

**कुब्जाम्रक** न० भारतप्रसिद्धे तीर्थभेदे "ततः कुब्जाम्रकं गच्छेत् तीर्थसेवी नराधिप!। गोसहस्रमवाप्नोति स्वर्गलोकं च गच्छति" भा० व० ८४ अ०। तच्च तीर्थं ब्रह्मावर्त्तसमीपस्थं तत्रैव विवृतिः।

**कुब्जिका** स्त्री १अष्टवर्षायां कन्यायाम्। "अष्टवर्षा च कुब्जिका" अन्नदाकल्पः कालसङ्कर्षाशब्दे २००४पृ०विवृतिः। २देवीमूर्त्तिभेदे तस्याः पूजादिविधायकं तन्त्रं कुब्जिका तन्त्रत्वेन प्रसिद्धम् तन्त्रसारे तत्प्रमाणं दृश्यम्।

**कुब्र** न० कुबि–आच्छादने रन् ऋज्रेन्द्रेत्यादिना नि०। अरण्ये उज्ज्वलदत्तः। २कुण्डे ३कुण्डले ४ तन्तौ ५शरणे ६शकटे च संक्षिप्तसारवृत्तिः।

**कुब्र(ब्रं)ह्म** पु० कुत्सितो ब्र(ब्रं)ह्मा वा टच्। कुत्सिते ब्र(ब्रं)ह्मणि टजभावपक्षे कुब्र(ब्रं)ह्मन्शब्दोऽप्यत्र।

**कुभ** उन्दने भ्वा०पर०सक०सेट्। कोभति अकोभीत् चुकोभ। क०भा०माधवसंमतोऽयम्। [ विवृतिः।

**कुभ** न० कुभ–क। उदके क०भा० माधवः। कुभन्युशब्दे

**कुभन्यु** त्रि०कुभ–कर्म्मणि घञर्थे क कुभमुदकमिच्छति क्यच् बा० अनङ् छन्दसि उ। आत्मनः सेकमिच्छति उदकस्य सेक्तरि "छन्दस्तुभः कुभन्यवः" ऋ० ५, ५२, १२, कुभन्यवः कुभिरुन्दनकर्म्मा" भा०।

**कुभा** स्त्री कोः पृथिव्याः भा। पृथिवीच्छायायाम् "राहुः कुभामण्डलगः शशाङ्कम्" ज्योति०। उपरागशब्दे १२८५पृ० विवृतिः। कुगतिस०। २कुत्सितदीप्तौ। "मा वोरसानितभा कुभा" ऋ० ५,५३,९, "कुभा कुत्सित दीप्तिः" भा०। ३तद्युक्ते त्रि०।

**कुभृत्** पु० कुं पृथिवीं बिभर्त्ति भृ–क्विप्। १भूधरे शैले २सप्तसंख्यायाम्। एकादिशब्दे १५०८पृ० विवृतिः कुभृद्रेखिकं सप्तशलाकाचक्रम् ज्योति०।

**कुमार** केलौ अद० चुरा० उभ० अक० सेट्। कुमारयति ते अचुकुमारत् त। कुमरयाम् बभूव आस चकार चक्रे।

**कुमार** पु०कुमारयति क्रीडति, कुत्सितो मारो यस्मात्, कौमारयति दुष्टान् कृ–णिच्–अच् वा। १कार्त्तिकेये, नाथ्योक्तौ २युवराजे, अम० ३शुके पक्षिणि ४अश्ववारके, ५वरुणवृक्षे ६पञ्चवर्षीये, बालके च मेदि०। "कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि" भाग० १०श्रीधर-